श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीधन्वन्तर्यष्टोत्तरशतनामस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीधन्वन्तर्यष्टोत्तरशतनामस्तोत्रम् ॥

धन्वन्तरिः सुधापूर्णकलशाढ्यकरो हरिः।
जरामृतित्रस्तदेवप्रार्थनासाधकः प्रभुः ॥ १ ॥

निर्विकल्पो निस्समानो मन्दस्मितमुखाम्बुजः।
आञ्जनेयप्रापिताद्रिः पार्श्वस्थविनतासुतः ॥ २ ॥

निमग्नमन्दरधरः कूर्मरूपी बृहत्तनुः।
नीलकुञ्चितकेशान्तः परमाद्भुतरूपधृत् ॥ ३ ॥

कटाक्षवीक्षणाश्वस्तवासुकिः सिंहविक्रमः।
स्मर्तृहृद्रोगहरणो महाविष्ण्वंशसम्भवः ॥ ४ ॥

प्रेक्षणीयोत्पलश्याम आयुर्वेदाधिदैवतम्।
भेषजग्रहणानेहस्स्मरणीयपदाम्बुजः ॥ ५ ॥

नवयौवनसम्पन्नः किरीटान्वितमस्तकः।
नक्रकुण्डलसंशोभिश्रवणद्वयशष्कुलिः ॥ ६ ॥

दीर्घपीवरदोर्दण्डः कम्बुग्रीवोऽम्बुजेक्षणः।
चतुर्भुजः शङ्खधरः चक्रहस्तो वरप्रदः ॥ ७ ॥

सुधापात्रोपरिलसदाम्रपत्रलसत्करः।
शतपद्याढ्यहस्तश्च कस्तूरीतिलकाञ्चितः ॥ ८ ॥

सुकपोलस्सुनासश्च सुन्दरभ्रूलताञ्चितः।
स्वङ्गुलीतलशोभाढ्यो गूढजत्रुर्महाहनुः ॥ ९ ॥

दिव्याङ्गदलसद्बाहुः केयूरपरिशोभितः।
विचित्ररत्नखचितवलयद्वयशोभितः ॥ १० ॥

www.prapatti.com

समोल्लसत्सुजातांसश्चाङ्गुलीयविभूषितः ।
सुधागन्धरसास्वादमिलद्भृङ्गमनोहरः ॥ ११ ॥

लक्ष्मीसमर्पितोत्फुल्लकञ्जमालालसद्गलः ।
लक्ष्मीशोभितवक्षस्को वनमालाविराजितः ॥ १२ ॥

नवरत्नमणीक्लृप्तहारशोभितकन्धरः ।
हीरनक्षत्रमालादिशोभारञ्जितदिङ्मुखः ॥ १३ ॥

विरजोऽम्बरसंवीतो विशालोराः पृथुश्रवाः ।
निम्ननाभिः सूक्ष्ममध्यः स्थूलजङ्घो निरञ्जनः ॥ १४ ॥

सुलक्षणपदाङ्गुष्ठः सर्वसामुद्रिकान्वितः ।
अलक्तकारक्तपादो मूर्तिमद्वार्धिपूजितः ॥ १५ ॥

सुधार्थान्योन्यसंयुध्यद्देवदैतेयसान्त्वनः ।
कोटिमन्मथसङ्काशः सर्वावयवसुन्दरः ॥ १६ ॥

अमृतास्वादनोद्युक्त देवसङ्घपरिष्टुतः ।
पुष्पवर्षणसंयुक्तगन्धर्वकुलसेवितः ॥ १७ ॥

शङ्खतूर्यमृदङ्गादिसुवादित्राप्सरोवृतः ।
विष्वक्सेनादियुक्पार्श्वः सनकादिमुनिस्तुतः ॥ १८ ॥

साश्चर्यसस्मितचतुर्मुखनेत्रसमीक्षितः ।
साशङ्कसंभ्रमदितिदनुवंश्यसमीडितः ॥ १९ ॥

नमनोन्मुखदेवादिमौळिरत्नलसत्पदः ।
दिव्यतेजः पुञ्जरूपः सर्वदेवहितोत्सुकः ॥ २० ॥

स्वनिर्गमक्षुब्धदुग्धवाराशिर्दुन्दुभिस्वनः ।
गन्धर्वगीतापदानश्रवणोत्कमहामनाः ॥ २१ ॥

निष्किञ्चनजनप्रीतो भवसंप्राप्तरोगहृत् ।
अन्तर्हितसुधापात्रो महात्मा मायिकाग्रणीः ॥ २२ ॥

क्षणार्धमोहिनीरूपः सर्वस्त्रीशुभलक्षणः ।
मदमत्तेभगमनः सर्वलोकविमोहनः ॥ २३ ॥

स्रंसन्नीवीग्रन्थिबन्धासक्तदिव्यकराङ्गुलिः ।
रत्नदर्वीलसद्धस्तो देवदैत्यविभागकृत्॥ २४ ॥

सङ्ख्यातदेवतान्यासो दैत्यदानववञ्चकः ।
देवामृतप्रदाता च परिवेषणहृष्टधीः ॥ २५ ॥

उन्मुखोन्मुखदैत्येन्द्रदन्तपङ्क्तिविभाजकः ।
पुष्पवत्सुविनिर्दिष्टराहुरक्षः शिरोहरः ॥ २६ ॥

राहुकेतुग्रहस्थानपश्चाद्गतिविधायकः ।
अमृतालाभनिर्विण्णयुध्यद्देवारिसूदनः ॥ २७ ॥

गरुत्मद्वाहनारूढः सर्वेशस्तोत्रसंयुतः ।
स्वस्वाधिकारसन्तुष्टशक्रवह्न्यादिपूजितः ॥ २८ ॥

मोहिनीदर्शनायातस्थाणुचित्तविमोहकः ।
शचीस्वाहादिदिक्पालपत्नीमण्डलसन्नुतः ॥ २९ ॥

वेदान्तवेद्यमहिमा सर्वलोकैकरक्षकः ।
राजराजप्रपूज्याङ्घ्रिः चिन्तितार्थप्रदायकः ॥ ३० ॥

धन्वन्तरेर्भगवतो नाम्नामष्टोत्तरं शतम्।
यः पठेत्सततं भक्त्या नीरोगस्सुखभाग्भवेत्॥ ३१ ॥

॥ इति श्रीधन्वन्तर्यष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥